श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे अष्टमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे अष्टमोऽध्यायः ॥

श्रीशुक उवाच
एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको
ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकान्त
उपविवेश ॥ **1** ॥

तत्र तदा राजन् हरिणी पिपासया
जलाशयाभ्याशमेकैवोपजगाम ॥ **2** ॥

तया पेपीयमान उदके तावदेवाविदूरेण नदतो
मृगपतेरुन्नादो लोकभयङ्कर उदपतत् ॥ **3** ॥

तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकित -
निरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया
पारिप्लवदृष्टिरगततृषा भयात्सहसै -
वोच्चक्राम ॥ **4** ॥

तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो
योनिनिर्गतो गर्भः स्रोतसि निपपात ॥ **5** ॥

तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन
वियुज्यमाना कस्याञ्चिद्दर्यां कृष्णसारसती
निपपाताथ च ममार ॥ 6 ॥

तं त्वेणकुणकं कृपणं स्रोतसानूह्यमानमभि -
वीक्ष्यापविद्धं बन्धुरिवानुकम्पया राजर्षि -
र्भरत आदाय मृतमातरमित्याश्रमपदमनयत् ॥ 7 ॥

तस्य ह वा एणकुणक उच्चैरेतस्मिन् कृतनिजाभि -
मानस्याहरहस्तत्पोषणपालनलालनप्रीणना -
नुध्यानेनात्मनियमाः सहयमाः पुरुषपरिचर्यादय
एकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल
सर्व एवोदवसन् ॥ 8 ॥

अहो बतायं हरिणकुणकः कृपण ईश्वररथचरण -
परिभ्रमणरयेण स्वगणसुहृद्बन्धुभ्यः परिवर्जितः
शरणं च मोपसादितो मामेव मातापितरौ
भ्रातृज्ञातीन् यौथिकांश्चैवोपेयाय नान्यं
कञ्चन वेद मय्यतिविस्रब्धश्चात एव मया
मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयुना -
नुष्ठेयं शरण्योपेक्षा दोषविदुषा ॥ 9 ॥

नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद
एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षन्ते ॥ 10 ॥

इति कृतानुषङ्ग आसनशयनाटनस्नानाशनादिषु
सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ 11 ॥

कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणो
वृकसालावृकादिभ्यो भयमाशंसमानो यदा सह
हरिणकुणकेन वनं समाविशति ॥ **12** ॥

पथिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणय -
भरहृदयः कार्पण्यात्स्कन्धेनोद्वहति एवमुत्सङ्ग
उरसि चाधायोपलालयन् मुदं परमामवाप ॥ **13** ॥

क्रियायां निर्वर्त्यमानायामन्तरालेऽप्युत्थायोत्थाय
यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन
मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स
ते सर्वत इति ॥ **14** ॥

अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः
सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदय -
सन्तापस्तमेवानुशोचन् किल कश्मलं महदभि -
रम्भित इति होवाच ॥ **15** ॥

अपि बत स वै कृपण एणबालको मृतहरिणी -
सुतोऽहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य
कृतविस्रम्भ आत्मप्रत्ययेन तदविगणयन् सुजन
इवागमिष्यति ॥ **16** ॥

अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरन्तं
देवगुप्तं द्रक्ष्यामि ॥ **17** ॥

अपि च न वृकः सालावृकोऽन्यतमो वा नैकचर
एकचरो वा भक्षयति ॥ **18** ॥

निम्लोचति ह भगवान् सकलजगत्क्षेमोदयस्त्रय्या -
त्माद्यापि मम न मृगवधून्यास आगच्छति ॥ **19** ॥

अपिस्विदकृतसुकृतमागत्य मां सुखयिष्यति
हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृग -
दारकविनोदैरसन्तोषं स्वानामपनुदन् ॥ **20** ॥

क्ष्वेलिकायां मां मृषा समाधिनाऽऽमीलितदृशं
प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुष -
विषाणाग्रेण लुठति ॥ **21** ॥

आसादितहविषि बर्हिषि दूषिते मयोपालब्धो
भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहित -
करणकलाप आस्ते ॥ **22** ॥

किं वा अरे आचरितं तपस्तपस्विन्यानया
यदियमवनिः सविनयकृष्णसारतनयतनुतर -
सुभगशिवतमाखरखुरपदपङ्क्तिभिर्द्रविण -
विधुरातुरस्य कृपणस्य मम द्रविणपदवीं
सूचयन्त्यात्मानं च सर्वतः कृतकौतुकं
द्विजानां स्वर्गापवर्गकामानां देवयजनं
करोति ॥ **23** ॥

अपिस्विदसौ भगवानुडुपतिरेनं मृगपतिभया -
न्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनु -
कम्पया कृपणजनवत्सलः परिपाति ॥ **24** ॥

किं वाऽऽत्मजविश्लेषज्वरदवदहनशिखाभि -
रुपतप्यमानहृदयस्थलनलिनीकं मामुपसृत -

मृगीतनयं शिशिरशान्तानुरागगुणितनिज -
वदनसलिलामृतमयगभस्तिभिः स्वधयतीति च ॥ **25** ॥

एवमघटमानमनोरथाकुलहृदयो मृगदारका -
भासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः स
योगतापसो भगवदाराधनलक्षणाच्च कथमितरथा
जात्यन्तर एणकुणक आसङ्गः साक्षान्निःश्रेयस -
प्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य
तस्यैवमन्तरायविहतयोगारम्भणस्य राजर्षेर्भरतस्य
तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषङ्गेणा -
विगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः
कालः करालरभस आपद्यत ॥ **26** ॥

तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचन्त -
मभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य
लोकमिमं सह मृगेण कलेवरं मृतमनु न मृतजन्मा -
नुस्मृतिरितरवन्मृगशरीरमवाप ॥ **27** ॥

तत्रापि ह वा आत्मनो मृगत्वकारणं भगव -
दाराधनसमीहानुभावेनानुस्मृत्य भृशमनु -
तप्यमान आह ॥ **28** ॥

अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्त -
समस्तसङ्गस्य विविक्तपुण्यारण्यशरणस्यात्मवत
आत्मनि सर्वेषामात्मनां भगवति वासुदेवे
तदनुश्रवणमननसङ्कीर्तनाराधनानुस्मरणा -
भियोगेनाशून्यसकलयामेन कालेन समावेशितं

समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्या -
रान्मृगसुतमनु परिसुस्राव ॥ 29 ॥

इत्येवं निगूढनिर्वेदो विसृज्य मृगीं मातरं
पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं
शालग्रामं पुलस्त्यपुलहाश्रमं कालञ्जरा -
त्प्रत्याजगाम ॥ 30 ॥

तस्मिन्नपि कालं प्रतीक्षमाणः सङ्गाच्च भृशमुद्विग्न
आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो
मृगत्वनिमित्तावसानमेव गणयन् मृगशरीरं
तीर्थोदकक्लिन्नमुत्ससर्ज ॥ 31 ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे भरतचरिते अष्टमोऽध्यायः ॥